# CAMBRIAN PUBLIC SCHOOL

**KANKE ROAD, RANCHI**

**Revision Assignment**

**Subject: Sanskrit** **Class: X**

**I.** अधोलिखितं गद्यांश पठित्वा प्रश्नानाम् उत्तराणि लिखत-

राज्ञि एवं विचारयति सति तस्य दानशीलतां परीक्षितुं देवाधिपति शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदतु-हे राजन् ! भवतः दानवीरताम् आकर्ण्य आशान्वितः भवत्समीपम् आगतोऽस्मि । देव ! रवि-शशि-तारा-मण्डलभूषितं जगत् एतत् कथमिव पश्येयम् चक्षुर्हीनः ।

**1)** एकपदेन उत्तरत-

a) राज्ञः दानवीरताम् आकर्ण्य कः आगतः ?

b) शक्रः कीदृशो भूत्वा तत्र आगतः आसीत् ?

c) देवाधिपतिः नाम कः ?

**2)** पूर्णवाक्येन उत्तरत-

a) नृपस्य दानशीलतां परीक्षितुं कः आगतः आसीत् ?

b) जगत् कीदृशम् अस्ति ?

c) शक्रः राज्ञः प्रति किं अवदत् ?

**3)** निर्देशानुसारम् उत्तरत

a) 'रवि-शशि-तारा-मण्डलभूषितम्' इत्यस्य विशेषणस्य .
विशेष्यः अत्र अनुच्छेदे कः?

b) अस्मिन् अनुच्छेदे 'अन्धः' इत्यस्य पदस्य कः पर्यायः
प्रयुक्तः ?

c) 'शक्रः नेत्रहीनयाचकस्य रूपं धारयित्वा तत्पुरतः अवदत्'
इति। अस्मिन् वाक्ये क्रियापदस्य कर्तृपदं किम् ?

**II.** काकः –रे परभृत। अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

राजहंसः – शान्तं शान्तम्। अहमेव नीरक्षीरविवेकी पक्षिणां राजा।

बकः –धिक् युष्मान्। अहमेव सर्वशिरोमणिः । (ततः प्रकृतिमाता प्रविशति)

प्रकृतिः– (सस्नेहम्) अलम् अलं मिथः कलहेन। अहं प्रकृतिः एव युष्माकं जननी। यूयं सर्वे एव मम प्रियाः। सर्वेषामेव महत्त्वं विद्यते यथासमयम्। सर्वेः एव मे शोभा। न तावत् कलहेन समयं वृथा यापयेत।

**1)** एकपदेन उत्तरत-

a) नीरक्षीरविवेकी कः पक्षी कथ्यते?

b) काकः कस्य सन्ततिं पालयति?

c) करुणापरः पक्षिसम्राटः कः?

**2)** पूर्णवाक्येन उत्तरत-

a) प्रकृतेः शोभा कैः वर्तते ?

b) समयः केन न यापनीयः?

c) यथासमयम् केषाम् महत्त्वं विद्यते?

**3)** निर्देशानुसारम् उत्तरत-

a) 'परस्परम्' इति अर्थे किं पदम् अत्र प्रयुक्तम् ?

b) 'पक्षिसम्राट्' इति पदं कस्य विशेषणम् ?

c) 'लघुत्वम्' इत्यस्य कि विपर्ययपदमत्र प्रयुक्तम्

**III.** अथ अन्यस्मिन् अहनि स मेषो यावत् महानसं प्रविशति तावत् सूपकारेण अर्धज्वलितकाष्ठेन ताडितः। ऊर्णाप्रचुरः मेषः वह्निना जाज्वल्यमानशरीरः निकटस्थाम् अश्वशालां प्रविशति दाहवेदनया च भूमौ लुठति। तस्य क्षितौ प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः । ज्वालमालाकुलाः अश्वाः प्राणत्राणाय इतस्ततः अधावन्। तेषु केचिद् दग्धाः, केचिद् अर्धदग्धाः, केचन च पञ्चत्वं गताः ।

**1)** एकपदेन उत्तरत-

a) वह्निना जाज्वल्यमानशरीरः मेषः कुत्र प्रविशति ?

b) अश्वाः प्राणात्राणाय कुत्र अधावन् ?

c) अश्वशालाम् कः प्रविशति ?

**2)** पूर्णवाक्येन उत्तरत-

a) यदा मेषः क्षिती अलुठत् तदा किम् अभवत् ?

b) मेषः केन अर्धज्वलितकाष्ठेन ताडितः ?

c) स मेषः यावत् महानसं प्रविशति तावत् किम् अभवत् ?

**3)** निर्देशानुसारम् उत्तरत-

a) 'दिने' अस्य पर्यायवाचिपदं गद्यांशात् चिनुत ।

b) 'तेषु केचिद् दग्धाः।' अत्र क्रियापदं किम् ?

**IV.** निम्नलिखितश्लोकान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत-

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः।
अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजितः ॥

**1)** एकपदेन उत्तरत-

a) पापं कः चरति ?

b) 'वाष्र्णेय!' इति सम्बोधनं कस्य कृते वर्तते ?

c) पूरुषः काम् चरति ?

**2)** पूर्णवाक्येन उत्तरत-

a) पूरुषः इच्छन् पापं करोति अनिच्छन् वा?

b) पूरुषः कस्मात् इव नियोजितः अनिच्छन्नपि पापं करोति ?

c) कः बलात् इव नियोजतः अनिच्छन्नपि पापं करोति ।

**3)** निर्देशानुसारम् उत्तरत

a) 'पापं चरति पूरुषः' अत्र कर्तृपदं किम् ?

b) 'पुण्यम्' इति पदस्य कः विपर्ययः अत्र श्लोके प्रयुक्तः?

c) 'न इच्छन्' इत्यर्थे अत्र श्लोके किं पदं प्रयुक्तम् ?

**V.** काम एष क्रोध एष रजोगुणसमुद्भवः ।

महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥

**1)** एकपदेन उत्तरत-

a) कामः कीदृशः भवति ?

b) कं वैरिणं विद्ध्येत् ?

c) कः रजोगुणसमुद्भवः ?

**2)** पूर्णवाक्येन उत्तरत-

a) कामः कस्मात् गुणात् सम्भवति ?

b) जनानाम् कौ वैरिणौ भवतः ?

c) कामः क्रोधश्च कीदृशौ भवतः ?

**3)** निर्देशानुसारम् उत्तरत

a) श्लोके 'महापाप्मा' कस्य विशेषणम् अस्ति ?

b) 'विद्धि' रति क्रियायाः अन लोके कर्तपदं किं अस्ति?

**VI.** अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।

स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ॥

**1)** एकपदेन उत्तरत-

a) अस्मिन् श्लोके वाङ्मयं किं कथितम् ?

b) प्रथमं वाङ्मयं तपः कीदृशं वाक्यम् ?

c) सत्यं प्रियहितं वाक्यं वाङ्मयं किम् उच्यते ?

**2)** पूर्णवाक्येन उत्तरत-

a) अस्मिन् श्लोके किं वाङ्मयं तपः लिखितम् ?

b) अत्र श्लोके वाचः कति तपांसि लिखितानि ?

c) अनुद्वेगकरं स्वाध्यायाभ्यसनं चैव कम् तपः उच्यते

**3)** निर्देशानुसारम् उत्तरत-

a) 'वाङ्मयं तपः' अनयोः पदयोः विशेषणपदं किम्

b) श्लोके 'तपः' इति कर्तृपदस्य क्रियापदं किम् ?

c) 'सद्ग्रन्थाणां पठनम्' इत्यस्य पदस्य कः पर्याय अत्र अस्ति ?

**VII.** प्रश्न निर्माणं कुरुत ।

a) **<u>जगत्</u>** रवि-शशि-तारा-मण्डलभूषितम् अस्ति ।

b) लोके **<u>चक्षुषः</u>** दानं दुष्करम् अस्ति ।

c) राजा आत्मानम् **<u>अनुगृहीतं</u>** कर्तुम् इच्छति ।

d) राजा **<u>शक्राय</u>** चक्षुः समर्पितवान् ।

e) अहमेव सर्वेषां पक्षिणां **<u>माता</u>** ।

f) अनृतं वदसि चेत् **<u>काकः</u>** दशेत् ।

g) **<u>राजहंसः</u>** नीरक्षीरविवेकी इति मन्यते ।

h) **<u>सर्वेषाम्</u>** एव महत्त्वं विद्यते ।

i) मम **<u>पिच्छानाम्</u>** अपूर्वं सौन्दर्यम् ।

j) **<u>सूपकाराः</u>** तम् आशु ताडयन्ति स्म ।

k) **<u>नीतिविदाम्</u>** अग्रणीः वानरयूथपतिः अचिन्तयत् ।

l) एतेषां कलहो न **<u>वानराणां</u>** हिताय ।

m) **<u>स यूथपः</u>** सर्वान् कपीन् अवदत् ।

n) ज्वलन् मेषः **<u>अश्वशालां</u>** प्रविशति ।

o) मनः **<u>अभ्यासेन</u>** गृह्यते ।

p) कामात् क्रोधः अभिजायते ।

**VIII.** मञ्जूषायाः सहायतया पाठाधारित कयापूर्ति कुरुत-

एकस्मिन् नगरे चन्द्रः नाम (i) .............. वसति स्म। तस्य पुत्राः वानरैः सह क्रीडन्ति स्म। तेभ्यः भोजनं च यच्छन्ति स्म। तत्रैव एकं मेषयूथम् आसीत् येषु एकः मेषः (ii) .............. प्रविश्य सर्वमेव भक्षयति । मेषस्य सूपकाराणां मध्ये (iii) .............. दृष्ट्वा यूथपतिः कपीन् राजगृहं त्यक्तुम् अवदत् । यूथपतिः एकाकी एव वनम् अगच्छत् यतः ते कपयः (iv) .............. त्यक्तुम् न इच्छन्ति स्म । ततः सः मेषः यावत् महानसं प्रविशति तावत् सः सूपकारेण च (v) .............. काष्ठेन ताडितः । ऊर्णाप्रचुरः मेषः

जाज्वल्यमानशरीरः दाहवेदनया भूमौ लुठति। तस्य प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः । ज्वालमालाकुलाः अश्वाः अधावन् तेषु केचन (vi) .............. वैद्येन उक्तं यत् कपिमेदसा एव दाहदोषस्य (vii) .............. भविष्यति । भयत्रस्ताः कपयः अचिन्तयन् यत् अस्माभिः (viii) .............. अवधीरिताः ।

**<u>मञ्जूषा</u> –**

**स्वर्गसमानोपभोगान्, अर्धज्वलितेन, राज गुरुजनोपदेशाः, पाकशालां, नाशः, कलहं, दग्धाः।**

**IX.** राजहंसौ, काकं

(i) .............. मयूर कोकिल च कलहमानान् दृष्ट्वा अन्ते (ii) .............. प्रविशति । सा सर्वान् पक्षीः सस्नेहं वदति यत् अहमेव (iii) .............. माता अस्मि । युष्माभिः एव मम (iv) .............. । अतः कलहेन (v) .............. वृथा मा यापयेत। यूयं सर्वे मिलित्वा परस्परं (vi) .............. जीवनं च रसमयं कुरुध्वम्। ततः परं सर्वे गायन्ति-आयुषः एकं (vii) .............. अपि कोटिशः (viii) .............. प्राप्तव्यम् अतः एतं कदापि (ix) .............. च न व्यतीतयेत् । जगत्पतेः ईश्वरस्य अस्यां रमणीयसृष्टी कदापि (x) .............. न कुर्यात् । सर्वे जीवाः मिलित्वा परस्परं भावयन्तः प्रसीदन्तु ।

**<u>मञ्जूषा</u>**

**मोदध्वम्, कलहं, स्वर्णमुद्राभिः, क्षणम्, बकम्, युष्माकम्, शोभा, प्रकृतिमाता, निरर्थकम्, जीवनम्**

**X.** एकस्मिन् दिवसे नृपस्य

(i) .............. परीक्षां कर्तुं देवराजः इन्द्रः एकस्य (ii) .............. रूपं धृत्वा तस्य अग्रे आगत्य अदवत्-हे राजन्! (iii) .............. दानशीलतां श्रुत्वा आशा (iv) .............. भवतः समीपम् अहम् आगतवान् । देव ! (v) .............. मण्डलयुक्तम् इदं जगत् (vi) .............. अहं कथं पश्येयम्? तं श्रुत्वा (vii) .............. अवदत् "भगवन् ! भवतः इच्छां सम्पूर्य अहम् (viii) .............. अनुगृहीतं कर्तुम् इच्छामि । आदिशतु भवान् (ix) .............. किं करवाणि"?

भिक्षुकः अवदत् - "यदि भवान् प्रसन्नः अस्ति तर्हि अहंभवन्तम् एकं (x) .............. याचामि ।"

**<u>मञ्जूषा</u> –**

**नेत्रहीनयाचकस्य, अहम्, युक्तः, नेत्रहीनः नृपः, आत्मानम्, सूर्य-चन्द्र-तारकाणाम्, दानशीलतायाः, नेत्रम्, भवताम्**

**********